শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীনৃসিংহরাঘৱদাসেন কৃতং

# ॥ শ্রীৱেদান্তরামানুজমহাদেশিকন্ মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীৱেদান্তরামানুজমহাদেশিকন্ মঙ্গলম্ ॥

ৱিৱেক ৱৃত্ত ৱৈরাগ্য নিধিঃ নিত্যপ্রিযং ৱদঃ।
ৱেদান্তলক্ষ্মণমুনিঃ সন্নিধত্তাম্ সদা হৃদি ॥ **1** ॥

সূরিসূক্তসুধাসিক্তৱচসে ৱিজিতাত্মনে।
শ্রুত্যন্তলক্ষ্মণাখ্যায দেশিকাযাস্তু মঙ্গলম্ ॥ **2** ॥

সূরযঃ স্ৱৱচোমর্মৱ্যাখ্যানায যদাত্মনা।
কৃপযাত্রাগতাস্সর্ৱে তস্মৈ ভৱতু মঙ্গলম্ ॥ **3** ॥

অপর্যাপ্তামৃতাসক্তচেতসে দীর্ঘবন্ধৱে।
দযার্দ্রহৃদযাযাস্তু গুরৱে ভূরি মঙ্গলম্ ॥ **4** ॥

শঠকোপমুনিপ্রোক্তশাস্ত্রতত্ত্ব প্রদাযিনে।
প্রাচেতসাদি হৃদ্যার্থ ৱেত্ত্রে প্রাজ্ঞায মঙ্গলম্ ॥ **5** ॥

শ্রীনাথো যামুনার্যশ্চ রামানুজমুনিস্তথা।
যদ্রূপেণাত্রাৱতীর্ণাঃ তস্মৈ শ্রেষ্ঠায মঙ্গলম্ ॥ **6** ॥

ৱাচোৱিধেযৱেদান্তযুগ্মায ৱিজিতাত্মনে।
ৱাগধীশাৱতারায তস্মৈ ৱিজ্ঞায মঙ্গলম্ ॥ **7** ॥

সমালোডিতশাস্ত্রায সারার্থামৃতদাযিনে।
সদ্ভির্নুতায সততং সর্ৱজ্ঞাযাস্তু মঙ্গলম্ ॥ **8** ॥

ৱিক্রমাক্রান্তলোকায ৱিজিতাখিলচেতসে।
ৱিনতাৱনদীক্ষায তস্মৈ ৱেদ্যায মঙ্গলম্ ॥ **9** ॥

ৱেদান্তলক্ষ্মণ মুনেঃ ৱেদার্থামৃতৱর্ষিণঃ।
সমাত্তসকলার্থায সারজ্ঞাযাস্তু মঙ্গলম্॥ **10**॥

হিতং করায লোকানাং স্মিতপূর্ৱাভিভাষিণে।
শ্রেযঃ প্রদায সর্ৱেষাং তস্মৈ হৃদ্যায মঙ্গলম্॥ **11**॥

কলাধরায তপ্তানাং কলহংসস্ৱরায চ।
কলিতাখিলসৌখ্যায কলিহন্ত্রেস্তু মঙ্গলম্॥ **12**॥

পরৱাদীভহরযে পরিৱ্রাজকভূভৃতে।
পরিপালিতশিষ্যায পারজ্ঞাযাস্তু মঙ্গলম্॥ **13**॥

স্থিরচিত্তায সততং সাধুৱৃত্ত নিষেৱিনে।
সৎসম্প্রদাযসিদ্ধায তস্মৈ সেৱ্যায মঙ্গলম্॥ **14**॥

মীনপুষ্যেঽৱতীর্ণায মানমেযৱিৱেকিনে।
জ্ঞানদায চ সর্ৱেষাং তস্মৈ নাথায মঙ্গলম্॥ **15**॥

ৱিদিতাখিলৱেদ্যায ৱেদান্তার্থপ্রদাযিনে।
শ্রীমদ্ৱেদান্তরামানুজাখ্যায গুরৱে নমঃ॥ **16**॥

নৃসিংহরাঘৱাখ্যেন ছাত্রেণেহ সতাং মুদে।
প্রণীতং মঙ্গলমিদং তনোতু ভুৱি মঙ্গলম্॥ **17**॥

॥ ইতি শ্রীৱেদান্তরামানুজমহাদেশিকন্ মঙ্গলং সমাপ্তম্॥